International Journal of Sanskrit Research 2020; 6(1): 191-194

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 191-194
© 2020 IJSR
www.anantaajournal.com
Received: 08-11-2019
Accepted: 12-12-2019

**Dr. Girijaprasad Shadangi**
HOD, Department of Samaveda, Sri Venkateswara Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Dr. Girijaprasad Shadangi**
HOD, Department of Samaveda, Sri Venkateswara Vedic University, Tirupati, Andhra Pradesh, India

# सामवेदीयप्रकृतिगानस्य समीक्षात्मकमध्ययनम्

**Dr. Girijaprasad Shadangi**

## प्रस्तावना

सामवेदजलाकीर्णं छन्दःकल्लोलसङ्कुलम् ।
तन्त्रग्राहान्वितं वन्दे सामवेदमहार्णवम् ॥

विदितचरमेव विदुषां चतुर्षु वेदेषु गानरूपस्य सामवेदस्य श्रेष्ठत्वम् । गीतासु भगवान् श्रीकृष्णः विभूतिवर्णनप्रसङ्गे "वेदानां सामवेदोऽस्मि"(भ.गी.10.22) इति कथयति । गीतिरूपः सामवेदः स्वस्वरूपमिति वर्णयति । तथा महाभारते अनुशासनपर्वणि "सामवेदश्च वेदानां" (14-3-17) इति सामवेदस्य प्रशंसा दृश्यते । सामरहितस्य यज्ञस्य अयज्ञत्वात् तैत्तिरीयसंहितायामुच्यते "अयज्ञो वा एष योऽसाम" (तै.सं.2.5.8) इति । तस्मात् सामवेदस्य यज्ञेषु प्राधान्यत्वात् श्रेष्ठत्वमुच्यते । एवं च वेदरूपवृक्षस्य सौन्दर्यमभिवर्धयति पुष्परूपं सामवेदः, उच्यते खलु "सामवेद एव पुष्पम्"(छा.उ.3.3.1) इति ॥

## सामशब्दार्थ

सामवेदस्य व्युत्पत्तिः छान्दोग्योपनिषदि "या ऋक् तत् साम" (छा.उ.1-3-4) इत्युक्त्वा प्रदर्शितं यदृचामेव संग्रहः "सामवेद" इति । "ऋचि अध्यूढं साम" (छा.उ.1-6-1) इति वचनमप्युच्यते ऋगाश्रितमेव साम भवति, नान्याश्रितमिति । बृहदारण्यकोपनिषदि ऐतेरयब्राह्मणे अथर्ववेदे च ऋक्साम्नोर्दम्पतित्वं वर्णितम् । यथा-

**अमोऽहमस्मि सा त्वं, सामाहमस्म्यृक्त्वमिति ॥** (ऐत.ब्रा.8.17, बृ.उ.6.4.20, अ.वे.14.2.71)
अहं अमसंज्ञकः पतिरूपोऽस्मि, त्वं च ऋग्रूपा पत्नीति । बृहदारण्योपनिषदि साम्नः निर्वचनमेवं क्रियते यथा- "सा च अमश्चेति तत्साम्नः सामत्वम्" (बृ.उ.1-3-22)। सा नाम ऋक्, तया सह संबद्धः अमो नाम स्वरः, तत् सामेति ॥ जैमिनिना "गीतिषु सामाख्या" (जै.सू.2.1.36) इति गीतिष्वेव मन्त्राणां सामसंज्ञा भवति, न केवलमन्त्रेषु इत्येवमाह । छान्दोग्योपनिषदि "का साम्नो गतिरिति स्वर इति होवाच" (1-8-4) शालावत्यदाल्भ्यसंवादे दृश्यते । बृहदारण्यकोपनिषदि "तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं, तस्य स्वर एव स्वम्" इति उक्तिरपि तदेव प्रतिपादयति, यत् साम्नः स्वर एव स्वं रूपमिति ॥ ऋग्वेदभाष्यभूमिकायां सामशब्देन साम्यमुक्तम् । "द्रुतातिविलम्बितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्य"मिति प्रतिपादितम् ॥

## सामवेदीनां भौगोलिकस्थिति

सम्प्रति देशे सामवेदस्य तिस्रः शाखाः दृश्यन्ते । एते क्रमशः कौथुम, राणायनी, जैमिनी इति । कौथुमाः गुजरातप्रदेशे गुर्जरशैलीं, पश्चिमबङ्गालप्रान्ते बङ्गशैलीं, तमिलनाडु प्रदेशे द्राविड(मद्र)शैलीं, ओडिशाप्रदेशे उत्कलशैलीं, काश्यां काशीशैलीं अनुसरन्ति । प्रान्तभेदेन, गानशैलीभेदेन कौथुमाः भिद्यन्ते । कर्णाटक, तमिलनाडु, पश्चिमबङ्गाल, ओडिशा, उत्तरप्रदेशः, राजस्थान, गुजरातप्रदेशेषु कौथुमशाखीयाः अधिकतया सन्ति ।
राणायनीयाः कर्णाटकः, आन्ध्रप्रदेशः, महाराष्ट्रः, उत्तरप्रदेशः, राजस्थान, तमिलनाडु, केरळ, मध्यप्रदेशः, हिमाचलप्रदेशेषु विद्यन्ते । एतेषु सर्वत्र कर्णाटकपाठः, आन्ध्रप्रदेशे तु गुर्जरपाठः. तूर्पुपाठः तथा ताम्रपर्णिपाठमनुसरन्ति ।
जैमिनीयाः केरळ-कर्णाटक-तमिलनाडु-आन्ध्रप्रदेश- मध्यप्रदेशेषु तिष्ठन्ति । तेषु केरळपाठशैली, द्राविडशैलीमिति पाठद्वयं दृश्यते । केरळपाठशैली विशिष्टा वर्तते । केरळीयजैमिनिशाखीयाः श्रौतपरम्परासु निपुणाः भवन्ति ॥

## सामवेदीयशाखा

ऋग्वेदीयसर्वानुक्रमणीव्याख्यायां "सहस्राध्वा सामवेदः" इत्युल्लिखतम् । अध्वाशब्देन देवता, गतिः,मार्गः, शाखाः इति

पर्यायशब्दाः सन्ति । महाभाष्यकारेण पतञ्जलिना “सहस्रवर्त्मा सामवेद” इति। सामवेदस्य सहस्रसंख्यकाः शाखाः सन्तीति । वर्त्मशब्दस्य शाखार्थत्वाभावादत्र गानपद्धतिभेदेन सहस्रधा भिद्यत इत्येवं दर्शयति । सामवेदस्य सहस्रशाखानां नामनिर्देशनं यत्र कुत्रापि न दृश्यन्ते । इतोऽपि ऋक्तन्त्रे “वं नैगिरुस्थे” इत्यनेन सूत्रेण नैगिशाखायाः ताण्ड्यब्राह्मणात् ताण्डि शाखायाः उपलब्धिः ज्ञायते । सामतन्त्रस्य प्रथमं सूत्रं “स्वरोऽनन्त्यः” इत्यत्र सामवेदे स्वराणां सहस्रात्मकसूत्रेण बहुविधत्वप्रतिपादितत्वात् सामवेदस्य गानपद्धतिरेव अत्र गृह्यते, नान्यत् । सामतर्पणविधौ – “राणायनी, शाट्यमुग्री, व्यासः, भागुरि, औलुण्डी, गौल्गुलवि, भानुमानौपमन्यवः, काराटिः, मशकगार्ग्यः, वार्षगण्यः, कुथुमः, शालिहोत्रः,जैमिनिः त्रयोदशैते इमे सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः” इति आचार्याणामुल्लेखः विद्यते ।
चरणव्यूहे -“राणायनी सात्यमुग्री दुर्वासा अथ भागुरिः। भारुण्डो गौल्गुलवीर्भगवानौपमन्यवः।। दारासो गार्ग्य सावर्णी वार्षगण्यश्च ते दश। कुथुमिः शालिहोत्रश्च जैमिनीयश्च त्रयोदश” इति वर्णितम् । तत्रैव राणायनीयाः सप्तभेदाः भवन्ति राणायनीयाः, शाट्यमुग्राः, कालोपाः, महाकालोपाः, लाङ्गलायनाः, शार्दूलाः, कौथुमाश्चेति । एते सप्तसामगाचार्याः सामशाखाप्रवर्तकाः आसन् । इदानीं तु राणायनीय-कौथुम-जैमिनीयेति शाखात्रयं दृश्यते । पुराणेष्वपि कतिपय सामशाखानां नाम्नां उल्लेखः लभ्यते । जिज्ञासवो द्रष्टुमर्हन्ति ।।

**सप्तगानात्मकः सामवेद**

सामवेदस्य आर्चिकसंहितामाधारीकृत्य गीयमानं गानं द्विविधम् । प्रकृतिगानं विकृतिगानमिति । पूर्वार्चिकमाधारीकृत्य गीयमानं गानं प्रकृतिगानं तथा उत्तरार्चिकमाधारीकृत्य गीयमानं गानं विकृतिगानमिति । पूर्वार्चिकस्य प्रथमोऽध्यायमाधरीकृत्य गानं आग्नेयगानं, द्वितीय-तृतीय-चतुर्थोऽध्यायमाधरीकृत्यगानं ऐन्द्रं गानम्, पञ्चमोऽध्यायमाधारीकृत्य गानं पावमानं गानम् तथा षष्ठोऽध्यायमाधारीकृत्य गीयमानं गानं आरण्यकं गानमिति प्रसिद्धिः। अयं प्रकृतिगानं सप्तविधम् । प्रथमं गायत्रं, द्वितीयं आग्नेयं, तृतीयं ऐन्द्रं, चतुर्थं पावमानं, पञ्चमम् अर्कद्वन्द्वव्रतञ्चेति त्रीणि पर्वाणि, षष्ठं शुक्रियं गानं, सप्तमं महानाम्नी इति ।। इत्युक्तप्रकारेण सामवेदे सप्तगानानि प्रसिद्धानि । तत्र प्रथमम्-

**गायत्रम्-** गायन्तं त्रायतेति गायत्रम् । चतुर्विंशत्यक्षरात्मिका गायत्रीछन्दसत्वात् गायत्रम् इति साम प्रसिद्धम् । गायत्र्यामुत्पन्नत्वादस्य गायत्रमिति संज्ञा । गायत्रीमन्त्रस्य परमेष्ठी प्रजापतिऋषिः, गायत्रीछन्दः, सविता देवता भवति । प्रकृतिगानान्तर्भूतं गायत्रं प्रथमं गानत्वेन परिगण्यते ।

**आग्नेयम्-** अस्मिन् पर्वणि पठ्यमानानां साम्नां अग्निदेवतात्मकत्वात्, अग्निसंबन्धत्वात् आग्नेयं साम इति व्यवहारः। “अग्न आयाहि” मन्त्रमारभ्य “यद्वा उ” पर्यन्तं 114 मन्त्राणां अग्निर्देवता उक्ता । एतेषां ऋचामाधारीकृत्य 180 सामानि विहितानि । पूर्वार्चिकस्य प्रथमोध्यायः अग्निदेवतात्मकः आग्नेयगानात्मकः विद्यते ।

**ऐन्द्रम्-** अस्मिन् पर्वणि पठ्यमानानां साम्नां इन्द्रदेवतात्वात्, इन्द्रदेवता संबन्धत्वात् वा ऐन्द्रमिति व्यवहारः। पूर्वार्चिकस्य द्वितीयाध्यायस्य “तद्वोगाय” ऋचमारभ्य चतुर्थोध्यायस्य “तव त्यन्नर्यं” पर्यन्तं ऋचामाधारीकृत्य गीयमानानि सामानि ऐन्द्रं गानमित्याचक्षते । ऐन्द्रकाण्डस्य मन्त्रसंख्या 352 । सामसंख्या 633 । ऐन्द्रकाण्डे गायत्री, बृहती, त्रिष्टुप्, अनुष्टुप्, जगती, उष्णिक्, ककुप्, पंक्तिः, द्विपदा, अत्यष्टिः इत्येतेषु छन्दस्सु ऋचः विद्यन्ते । एतेषां विभागः - ऐन्द्रगाने गायत्रम्, ऐन्द्रगाने अनुष्टुबाख्यम् एवं रूपेण व्यवहारः दृश्यते । जगतीछन्दसि गान समाप्त्यनन्तरं उष्णिक् छन्दसि गीयते । इन्द्रसुतेषु सोम (क्रोशम्-652) साममारभ्य तावत्यन्ना (ऐन्द्रम्-813) सामपर्यन्तं इन्द्रपुच्छमित्याचक्षते ।

**पावमानम्-** अस्मिन् पर्वणि पवमानस्सोमदेवतायाः स्तुतिः विहिता । अनेन अस्य पावमानगानमिति उच्यते । पूर्वार्चिकस्य पञ्चमोध्यायस्य “उच्चा ते” मन्त्रमारभ्य “य उस्रिया” पर्यन्तं ऋचामाधारीकृत्य गीयमानं साम्नां “पावमानसाम” इत्याख्या । पावमानकाण्डस्य मन्त्रसंख्या 119 पावमानकाण्डस्य गानसंख्या 384 विद्यते । अत्र गायत्री, बृहती, त्रिष्टुप्, जगती, उष्णिक्, ककुप्, तथा यवमध्या गायत्रीछन्दस्सु ऋचः विद्यन्ते । आहत्य प्रकृतिगाने 1198 सामानि सन्ति ।।

**आरण्यकम्-** आरण्यकगाने अर्क-द्वन्द्व-व्रत-शुक्रिय-महानाम्न्य इत्येवं पञ्चपर्वाणि भवन्ति । महानाम्नीसाम आरण्यकगानस्य परिशिष्टं वर्तते । तथैव उद्वयामे साम, भारुण्डं साम, एवं तवश्यावीयं साम, एते क्रमशः परिशिष्टत्वेन वर्तन्ते । आरण्कगानस्य निर्वचनं एवं क्रियन्ते विद्वद्भिः । यथा- अरण्ये एकान्ते रहस्ये गेयत्वात् अधीयमानत्वात् एतेषां साम्नां आरण्यकत्वेन रहस्यत्वेन च लोके प्रसिद्धिः । तथैव ग्रामगेयस्य वेदसाम्ना इति आरण्यकगानस्य छन्दस्साम्ना इति व्यवहारः दृश्यते । पुष्पसूत्रे वररुचिश्च-“छान्दसीषु (पु.सू.7.6.22) सिमासु च” (पु.सू.5.8.29) इत्यादि । खादिरगृह्यसूत्रे रुद्रस्कन्दश्च “अर्कद्वन्द्वव्रतानि छान्दसानि त्रीणि पर्वाणि अध्यापयीत” (खा.गृ.सू.2.5.34)।

**अर्कपर्व -** अस्मिन् पर्वणि पठ्यमानानां गानानां अर्कपदघटित श्रूयमाणत्वात् प्राणभृन्न्यायेन अर्कपर्वत्वेन व्यवहारः। यथा- स्वाशिरामर्कः, दीर्घतमसोर्कः, मरुतामर्कः, प्रजापतेरर्कः, इन्द्रस्यार्कः, अर्कशिरः, अर्कग्रीवः, यजुरर्कः, वरुणगोतमयोरर्कः, अर्कपुष्पमित्यादि ।

**द्वन्द्वपर्व-** अस्मिन् पर्वणि पठ्यमानानां साम्नां द्वन्द्वनाम्ना निर्देशात् द्वन्द्वपर्वत्वेन व्यवहारः क्रियते । यथा - वसिष्ठस्य प्राणापानौ द्वौ, इन्द्रस्येन्यौ द्वौ, प्रजापतेर्व्रतपक्षौ द्वौ, इन्द्राण्या उल्वजरायुणी द्वे, बृहस्पतेर्बलभिदी द्वे, भर्गयशसी द्वे, यामे द्वे, घर्मतनू द्वे, द्यौते द्वे, तौरश्रवसे द्वे, धेनुपयसी द्वे, स्वर्ज्योतिषी द्वे, बार्हद्गिरे द्वे, पार्थुरश्मे द्वे, वृषके द्वे, तन्त्वोतुनी द्वे, सहोमहसी द्वे, वार्कजम्भे द्वे, इषविश्वज्योतिषे द्वे, विस्पर्द्धसी द्वे, शफौ द्वौ, शुक्रचन्द्रे द्वे इत्यादयः।।

**व्रतपर्व-** अस्मिन् पर्वणि पठ्यमानानां साम्नां व्रतपदयुक्तत्वात् व्रतपर्वत्वेन व्यवहारः। अस्य व्रतपर्व अथवा वाचो व्रतपर्वत्वेनापि व्यवह्रियते । यथा- वाचोव्रतम्, कर्षूशयस्य व्रतम्, प्राजापत्यस्य व्रतम्, सोमव्रतम्, भारद्वाजस्य व्रतम्, भरद्वाजिनां व्रतम्, यमव्रतम्, अङ्गिरसां व्रतम्, अश्विनोर्व्रतम्, गवां व्रतम्, कश्यपस्य व्रतम्, अपां व्रतम्, अहोरात्रयोर्व्रतम्, रात्रेर्व्रतम्, विष्णोर्व्रतम्, वैश्वदेवव्रतम्, वसिष्ठव्रतम्, जमदग्नेर्व्रतम्, पुरुषव्रतम्, अन्तरिक्षस्य व्रतम्, पृथिवीव्रतम्, ऋष्यस्यसामव्रतम्, दिशां व्रतम्, कश्यपव्रतमित्यादयः।।

**शुक्रियपर्व-** अस्मिन् पर्वणि पठ्यमानानां साम्नां शुक्र (आदित्य) देवतावाचकत्वात् शुक्रियपर्व इत्यभिधानम् ।। यथा- अग्नेर्व्रतम्, आदित्यव्रतम्, सूर्यस्य भ्राजाभ्राजे द्वे इत्यादयः।।

**महानाम्नीपर्व-** महानाम्न्यः, शक्वर्यः इति गानाधारभूतानां संज्ञा । तासु ऋक्षु गीयमानत्वात् महानाम्नीपर्वत्वेन व्यवहारः क्रियते । यथा- विदामघवन्, आभिष्ट्वमभिष्टिभिः, एवा हि शक्रो, विदा राये, यो मँहिष्ठो, ईशे हि शक्रं, इन्द्रं धनस्य, पूर्वस्य यत्ते, प्रभो जनस्य इत्यादि ऋक्षु गीयमान साम्नां संज्ञा एवमेव भवति ।

**परिशिष्टगानम्-** एतदतिरिच्य परिशिष्टत्वेन उद्वयामे, भारुण्डसाम, तवश्यावीयमित्यादि ग्रन्थे संप्रदायानुसारेण सर्वत्र दृश्यते । उद्वयामे इत्यस्य न ऋचि नापि स्तोभपाठे आधारो लभ्यते । अनुपदसूत्रपाठे – इमानि छन्दांसि संस्कर्ता श्रावयेत् । “वेदादिवेदान्तानि त्रीण्याज्यदोहान्यादित्प्रत्नस्य रेतस उद्वयन्तमस उन्नयामि” इति पठ्यमानत्वात् गानस्यास्य ग्रहणं भवति । एवंरूपेण भारुण्डसाम्नः छलाक्षरगणना दृश्यमानत्वात् गानस्यास्य ग्रहणं क्रियते । शाखान्तरसामरूपेण तवश्यावीय साम्नः गणना क्रियते । तथा च खादिरगृह्यसूत्रे रुद्रस्कन्दः- “गायत्रस्य स्थाने तवश्यावीयम् ऊर्गित्यादिः हिं वम् इत्येतदन्तं तवश्यावीयमिति केचित् । इलान्दं पञ्चानुगानमिति केचित् । शाखान्तरस्थमित्यन्ये” इति स्पष्टयति ।।

**सामस्वरूपम्-** सामगानं ऋचामाधारीकृत्य भवति । क्वचित् ऋग्व्यतिरिक्तेषु वर्णसमूहेषु साम गीयते । तादृशा ऋग्व्यतिरिक्ताः वर्णाः स्तोभपदेन उच्यन्ते । स्तोभाः

त्रिविधाः- अक्षरस्तोभः, पदस्तोभः, वाक्यस्तोभश्चेति । तत्र औ...हो..वा..हा. ...इत्यादयः अक्षरस्तोभाः। अधिप, ताइ, अश्वाः गावः इत्यादयः पदस्तोभाः। अतिविश्वानि दुरितातरेम इत्यादयः वाक्यस्तोभाः। तथैव गानं त्रिविधम् केवलं ऋक्षु, केवलस्तोभेषु एवं स्तोभसहितऋक्षु इति । क्रमेण एते आविर्गानं, छन्नगानं, लेशगानमिति कथ्यते ॥

**भक्तिः-** सामगानं पञ्च अथवा सप्तभक्तिषु विभक्ताः भवन्ति । पञ्चभक्तयः क्रमेण प्रस्ताव, उद्गीथ, प्रतिहार, उपद्रव, निधनमिति । सप्तभक्तयः हिङ्कारं ओङ्कारं मिलित्वा भवन्ति । यज्ञे प्रस्तावभक्तेः पूर्वं हिङ्कारः तथा उद्गीथभक्तेः पूर्वं ओङ्कारः गीयते । यज्ञेषु सामवेदीयाः चत्वारः ऋत्विजः भवन्ति । ते यथा उद्गातृ- प्रस्तोतृ- प्रतिहर्तृ- सुब्रह्मण्या इति । आदौ हिङ्कारः सर्वैः गेयः। प्रस्तोता प्रस्तावभक्तिं, उद्गाता ओङ्कारपूर्वकं उद्गीथभक्तिं, प्रतिहर्ता प्रतिहारभक्तिं, पुनः उद्गाता उपद्रवभक्तिं, अन्ते सर्वैर्निधनभक्तिं गायेदिति श्रौतविधानम् ।

**मात्रा-** गाने मात्राणां विशिष्टं महत्वं वर्तते । मात्रा त्रिविधा । एकमात्रा भवेद्ह्रस्वः द्विमात्रा दीर्घ उच्यते त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् इति । ऋक्तन्त्रे तु अकारोच्चारणकालः वर्णः ह्रस्वसंज्ञकः भवति । "अकालो ह्रस्वः" (ऋ.त.1.4.10)। अकारोच्चारणकालः एकमात्रिकं भवति । "मात्रा" (ऋ.त.1.5.2)। अ,इ,उ,ऋ,लृ एते ह्रस्वसंज्ञकाः, एकमात्रिकं भवन्ति। "द्वे दीर्घम्"(ऋ.तं.1.5.3)। दीर्घाक्षरस्य द्विमात्राकालः। आ,ई,ऊ,ऋ इत्यादयः । "तिस्रो वृद्धम्" (ऋ.तं.1.5.4)तिस्रो मात्राः वृद्धसंज्ञाः। वृद्धस्य तिस्रः मात्राः। "ओग्नाइ" इति । सामसु त्रिमात्रम्(ऋ.तं.1.4.9)। सामसु अन्तरं त्रिमात्रं वेदितव्यम् । नित्यविरते भक्त्यन्तेषु च । वैस्वर्ये स्वरास्त्रिमात्राः (ऋ.तं.1.5.5)। वैस्वर्ये स्वराः त्रिमात्राः भवन्ति । ओ234इ-डा । त्रिमात्रिकस्य साम्नि वृद्ध इति व्यवहारः। सामसु यदक्षरं "0" अथवा "र" चिह्नेन अङ्कितं तत् दीर्घं द्विमात्रिकम् । दीर्घाक्षरं त्रिमात्रिकं वृद्धमिति ज्ञेयम् ।

**पर्व-** सामगाः यत्र विरम्य पठन्ति तत् विरते सामभागे पर्व इत्यभिधीयते । पर्व शब्दस्यानेकार्थः । अत्र पर्व शब्देन विभागः इति ज्ञातव्यम् । यथा ओग्नाइ । एकं पर्व । नारदीये तु त्रिरेखा यत्र दृश्येत सन्धिं तत्र विनिर्दिशेत् । स पर्व इति विज्ञेयः ....इति (ना.शि.1.6.8)।

**सामस्वरमण्डलम्-** सामवेदे स्वरमण्डलविषयमधिकृत्य उच्यते -स्वराणां समूहो मण्डलम् । षड्जादि सप्त स्वराः, षड्जादि त्रयो ग्रामाः. ग्रामो नाम स्वरसमूहः, तदुक्तं शार्ङ्गदेवेन "ग्रामः स्वरसमूहस्यान्- मूर्च्छनादेस्समाश्रयः" इति । तानाः एकोनपञ्चाशत् भवन्ति । परस्परं स्वराणां तननात्तानाः । नन्दी विशालादि मूर्च्छनाः एकविंशतिः । क्रमात् स्वराणां सप्तानामारोहणश्चावरोहणं मूर्च्छनेत्युच्यते ॥

सामवेदे मुख्यरूपेण सप्तस्वराः भवन्ति । ते तु क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्र-अतिस्वार्येति । एते स्वराः उत्तरोत्तरं नीचाः भवन्ति । सामविधानब्राह्मणे तद्योऽसौ क्रुष्टतम इव साम्नः इत्यारभ्य क्रुष्टादयः सप्तस्वराः उक्ताः। सायणाचार्येण स्वभाष्ये -"उपांशुव्यतिरिक्ताः सर्वा वाचः मन्द्र-मध्यम-उत्तमत्वेन त्रिस्थाना भवन्तीत्युदाहृतम् । अत्र मन्द्रस्थाना वाक् सप्तयमा क्रुष्टादिरूपा इत्यर्थः। क्रुष्टादयः स्वराः एव यमाः इत्युच्यन्ते" इति । ऋक्प्रातिशाख्ये शौनकः स्पष्टयति-"त्रीणि मन्द्रं मध्यमं उत्तमं च स्थानान्याहुः सप्त यमानि वाचः। सप्तस्वराः ते यमाः" इति (ऋ.प्रा.13.42,44) । एवं च तैत्तिरीयप्रातिशाख्ये "मन्द्रादि त्रिषु स्थानेषु सप्त सप्त यमाः॥ के ते यमाः चेद्युच्यन्ते- क्रुष्टादि अतिस्वार्यान्त" मिति (तै.प्रा.23.11.12)। एवं प्रकारेण साम्नि सप्तस्वराः शास्त्रेषु निरूपितम् ।

**अङ्गुलीषु सामस्वराणां विन्यासक्रमः-** प्राचीनकाले सामगानसमये वीणायाः उपयोगः दृश्यते परन्तु हस्तस्वरेण स्वराणां विन्यासक्रमः परम्परासु दृश्यते । अस्य गात्रवीणा इति नाम । शास्त्रकारेण सामगानकाले अङ्गुलीषु स्वरारोपणं कथं कर्तव्यम् । तथा च प्रदेशिन्यादि कनिष्ठायां अङ्गुलीषु विद्यमानमध्यत्रिरेखायां स्वरः कथं कर्तव्यमिति नारदीयशिक्षायामुक्तम् ॥ ना.शि.1.6.5,6,7,8 ॥ सर्वाः अङ्गुलीः प्रसार्य स्वरमण्डलं अङ्गुलीषु कुर्यात् । अङ्गुष्ठेन अङ्गुलीः स्पृशेत् । अङ्गुलीभिः अङ्गुष्ठं न स्पृशेत् इति ॥ ना.शि.1.6.3 ॥

**क्रुष्टादिमन्द्रान्तैः स्वरैरारभ्यमाणानां साम्नां संख्या एवं भवति-** यथा प्रथमस्वरेण-159, द्वितीयस्वरेण-331, तृतीयस्वरेण-153, चतुर्थस्वरेण-323, मन्द्रस्वरेण-527, आहत्यसंख्या-1493 भवति ॥

**अवान्तरस्वरम्-** अवान्तरस्वरास्तु- व्युत्क्रम-अतिक्रम-कर्षण-स्वाराः, विनत- प्रणत- उत्स्वरित-अभिगीताश्च भवन्ति । तत्र प्रत्युत्क्रमातिक्रमकर्षणस्वाराणां अङ्गुष्ठेन अङ्गुल्यादिषु योजनं कार्यम् । मात्रालक्षणग्रन्थे विनतादीनां स्वराणां स्वरूपमेवमुक्तम्-

**विनतम्-** प्रथमादिर्द्वितीयान्तम् । तर्जन्या अग्रभागमारभ्य तस्या मध्यमपर्वपर्यन्तम् ।

1वि 1 21वि 1
उदा - मयोऽ2गि । यंयंयंऽ2याम् ।

2
**प्रणतम्-** द्वितीयादिस्तृतीयान्तम् । तर्जन्या आरभ्य मध्यमायां पर्वपर्यन्तम् । उदा- द्यु

0 20 0 1
मन्तंदेवाऽ3 ॥ आयाहिऽ3वोइ....।

**उत्स्वरितम्-** चतुर्थादि मन्द्रान्तम् । अनामिकायां आरभ्य मध्यमायां पर्वपर्यन्तम् ।

5 40 4
उदा- मनुष्येऽ5भिरग्निः ।

**अभिगीतम्-** द्वितीयादिः प्रथमान्तम् । तर्जन्या अग्रभागे आरभ्य तस्य उपरिभागे

2 1 अ
अङ्गुष्ठे समाप्यते । उदा- र ओ इ य यू ऽ2 । अभिगीतस्य क्रुष्टादिप्रधानभूतसप्तस्वरान्तर्भावः स्यात् । तथास्त्विति चेत् अभिगीतस्य, अभिगीतत्वेनैव सामतन्त्रादिषु प्रसिद्धेः (सा.त-1.10.12)। अभिगीतस्य चिह्नं ग्रन्थे (अ) इति रूपेण प्रदर्श्यते । प्रत्युत्क्रमो अष्टविधो भवति । यथा -अतिस्वारो मन्द्रं प्रत्युत्क्रामति परिस्वारेपरे । अतिस्वारः मन्द्रस्वरं गत्वा पुनः स्वस्थानं स्पर्शं करोति तदा तस्य परिस्वार इति संज्ञा भवति । यथा- कयाऽ3स्थाऽ5इराऽ656न् । (साम.22)। मन्द्रः चतुर्थं प्रत्युक्रामति । यथा- तरोभिर्वोविदाऽ4द्वासूम् । (साम.292)। चतुर्थः तृतीयं प्रत्युत्क्रामति । यथा- दूताऽ3म्वोऽ3विश्ववेदसाम् (साम.21)। तृतीयो द्वितीयं प्रत्युत्क्रामति । यथा- हीऽ234षी । (साम.1)। द्वितीयः प्रथमं प्रत्युत्क्रामति । यथा- औहोऽ1इ । (साम. 10) । मन्द्रः चतुर्थमतिक्रम्य तृतीयं प्रत्युत्क्रामति । यथा- सुनोतसोमपा (साम.494)। मन्द्रः चतुर्थतृतीयस्वरावतिक्रम्य द्वितीयं प्रत्युत्क्रामति । यथा - बिभाऽ3उ । अभिप्रियाऽ2 । तृतीयो द्वितीयमतिक्रम्य प्रथमं प्रत्युत्क्रामति । यथा - पुनाऽ31 ॥

**अतिक्रमः-** अतिक्रमो नाम अवरोहणगीतौ स्वरः क्रमेणोपनतं स्वरान्तरं विहाय ततः पराचीनं स्वरं स्वरः प्राप्नोतीत्याशयः। यदा क्रमागतं स्वरमतिक्रम्य स्वरान्तरं प्राप्नोति

11
तदातिक्रमः। अतिक्रमः चतुर्विधः- क्रुष्टः प्रथमस्वरमतिक्रामति । यथा- ऊऽ1। नआगाऽ2345ही । प्रथमो द्वितीयमतिक्रामति । इमं स्वरं नमनम् इति व्यवहारः। यथा-

10 न 2 4 3
आ रो ऽ3 हा न् । तृतीयः चतुर्थमतिक्रामति । यथा य ज्ञा ऽ5य ॥ प्रथमस्वरः

1 1 2030 2
द्वितीयतृतीयचतुर्थान् त्रीन् स्वरानतिक्रामति । यथा - ईऽ5हीहीही हीही ।

1 1
**कर्षणं पञ्चविधम्-** आद्वितीयकर्षणम्- त्साऽ2इ (साम.1) । आतृतीयकर्षणम् - आ

1
ऽ23इन्द्राम् (साम.477)। आचतुर्थकर्षणम्- ता ऽ234म् ( साम.388 )।

1 5 5
आमन्द्रकर्षणम्- ओऽ2345इ (साम.5)। मन्द्रश्च अतिस्वार्यात् कृष्यते- त्वंत्वाऽ6मे (साम.72)।

2 1
**स्वारः त्रिविधः** स्वारस्य संप्रसारणमित्यपि संज्ञान्तरम् । उदा- प्रथमादिः- हरिऽ3श्री
111 2 111 3 111
ऽ2345(नवमात्रः)। द्वितीयादिः- आऽ345 । (षण्मात्रः) । तृतीयादिः-ऊऽ2345 (अष्टमात्रः) ॥

**धारि-** प्रथमादिमन्द्रान्तेषु पञ्चसु स्वरेषु धार्यं भवति । साम्नि यस्मिन्नचि स्वरनिर्देशो न भवति सोऽच् धारीशब्देन अभिधीयते । सोऽयं स्वरनिर्देशरहितोऽच् पूर्वस्याचः यः
1 2 3 0
स्वरः तत्स्वरभाग्भवति । प्रथमस्वरे- तयाइ । द्वितीयस्वरे- दृशेऽ1 । तृतीयस्वरे- समी ।
4 5
चतुर्थस्वरे-हिताः । मन्द्रस्वरे-अभि । अत्र य,शे,मी,ताः, भि - एते धार्याः इत्युच्यन्ते ।
1 - 20 -
प्रेङ्खो द्विविधः- प्रथमादिः - तोयाऽइ (साम.1) । द्वितीयादिः- ए भाऽ**2**इर्वर्धा (साम.14)। अस्य स्वरविन्यासस्तु- अङ्गुष्ठाग्रं प्रथमस्वरे निधाय तत एवाऽकाश मार्गेण भ्रमणं कृत्वा कनिष्ठिकामध्यमागत्य पुनस्तथैवोपरि आगत्य द्वितीयस्वरे अवस्थानम् ।

**श्रुतयः**- स्वरगता पञ्चविधाश्रुतयः भवन्ति । ते यथा- दीप्ता, आयता, मृदु, मध्य, करुणा इति । मृदुमध्यमयोः स्वरचिह्नं संप्रदायात् गुरुमुखाच्च ज्ञातव्यम् ।

**दीप्ता** – क्रुष्टात् परीभूते द्वितीये, द्वितीयस्वरे परे दीप्ता भवति ॥ दीप्ताश्रुतयः
^
उदाहरणानि- अभि त्वा वृषभा (साम-282) तूंपावाऽ1याऽ2 । य इन्द्र चमसेषु (साम-
^ ^
286) आ ऽ2इ । कया न श्चित्रः(साम.306) वा ऽ2र्तो...हाइ । आ त्वा सहस्रम्
^
(साम.414)- आ ऽ2इहि । नारदीयशिक्षायां मन्द्र-द्वितीय-चतुर्थ-अतिस्वार-तृतीयेषु दीप्ता श्रुतिः श्रूयते इति (1.7.10)॥

**आयता-** द्वितीये आयता भवति तृतीये परतः। ना.शि.1.7.12 भाष्ये इयं च ह्रस्वे दीर्घे चाक्षरे न श्रूयते ॥ लोमशिनी शिक्षायां उक्तम्-
ऊतापर्वणि, प्रहूयसापर्वणि, त्सिबापर्वणि, वारापर्वणि, महित्रीणा पर्वणि, च नित्यं आयता श्रुतिः प्रयोक्तव्या इति ।

**करुणा-** क्रुष्टे तु करणा श्रुतिः इति नारदीयवचनम् (ना.शि.1.7.10)। इयं श्रुतिः
11
क्रुष्टस्वरे श्रूयते । इयं श्रुतिः ग्रामगेयगाने स्थलत्रयेषु दृश्यते- ऊ (साम.492)- मो षु
11 ^ 11
त्वा वाघतः ॥ ऊ ऽ2 (साम.492)- मोषु त्वा वाघतः ॥ हो ऽ (साम.652) - इन्द्र सुतेषु सोमेषु ॥

**सामविकाराः-**

सामगाने षट् विकाराः भवन्ति । ते यथा - विकार-विश्लेषण-विकर्षणा-ऽभ्यास-विराम-स्तोमाख्याः षट् विकाराः भवन्ति ।
5
उदा- विकारो यथा “अग्ने” इत्यस्य “ओग्नाइ”(साम.1) इति, विश्लेषणं यथा
1 -
“वीतये” इत्यस्य “वोइतोयाऽ2इ(साम.2) इति ।
विकर्षणं यथा “ये” इत्यस्य “या23ऽइ”(साम.1) इति, अभ्यास इति पुनः पुनरुच्चारो
1 - 1 - 2 3 2 3 1 2
यथा “तोयाऽ2इ । तोयाऽ2इ” (साम.1),इति । विरामो यथा “गृणानो हव्यदातये”
1 0 20 1 -
इत्यस्य “गृणा नो ह । व्य दा तयो ऽ2 इ”(साम.1) इति । “गृणानोह” इत्यस्य पदान्तत्वाभावेऽपि गानसौकर्यार्थं शब्दमध्य एव विरामादस्य विरामसंज्ञा भवति । स्तोम ऋग्विलक्षणो वर्णो, यथा “औहोवा । हाइ”,इत्यादि । एतैः सामविकारैः सामगानं संवर्द्धितं, पुष्पितं च वर्तते । एतेषां माध्यमेन सामवेदः गानमयो भवति ।

**साम्नां ऋषिछन्ददेवताः-** प्रत्येकमपि सामसु ऋषिच्छन्दोदेवता भवन्ति । एतेषां किं वा प्रयोजनमिति प्रश्ने आर्षेयब्राह्मणे उच्यते- “ऋषीणां नामधेयगोत्रोपधारणम् । स्वर्ग्यं यशस्यं धन्यं पुण्यं पुत्र्यं पशव्यं ब्रह्मवर्च्चस्यं स्मार्तमायुष्यम् । यो ह वा अविदितार्षेय-च्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति । अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयान् भवत्ययातयामान्यस्य छन्दांसि तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति । ऋषीणां संस्थानो भवति संस्थानो भवति ब्रह्मणः स्वर्ग्यं लोके महीयते स्मरन्नजायते पुनर्य एवं वेद । तान्येतान्यार्षेयाणि योऽधीते ब्राह्मणः पङ्क्तिपावनो भवत्यर्घ्यः”॥ (आ.ब्रा.1.1.2-8) इति ।
सम्प्रति भारतवर्षे बहुत्र विविधाः अध्ययनपरम्पराः दृश्यन्ते । तत्र तत्र परिणताः सामगाः विद्वांसश्च विद्यन्ते । तत्र केषाञ्चन मूर्धन्यानां विदुषां भूरिप्रयत्ननेन वैदिक ग्रन्थानां प्राप्तिः इदानीन्तनकाले दृश्यते । परन्तु तेषां ग्रन्थानां पुनः पुनः मुद्रणाभावात् ग्रन्थाभावः एव अध्येतॄणां मुख्यः अनुत्साहस्य विषयोऽस्ति । एतावदेव सामवेदीयप्रकृतिगानं यथामति समीक्ष्य विरमामि विस्तरात् ॥

**सन्दर्भग्रन्थसूची-**


1. आर्षेयब्राह्मणम्-सम्पादकः- वि.आर् शर्मा,राष्ट्रियसंस्कृतविद्यापीठम्,तिरुपति-1962
2. नारदीयशिक्षा- सम्पादकः-सत्यव्रतसामश्रमी, कोलकत्ता, वर्ष-1947
3. नारदीयशिक्षा-भाष्यकर्तृ-भट्टशोभाकरः, सम्पादकः- डा गिरिजाप्रसाद षडंगी, वर्ष-2014
4. ऋक्तन्त्रम्-सम्पादकः- डा सूर्यकान्तः, मेहरचन्दलछमनदास, दिल्ली-1970
5. ऋक्तन्त्रम् सभाष्यम्- सम्पादकः-डा गिरिजाप्रसाद षडंगी, तिरुपति- वर्ष-2018
6. सामतन्त्रम्- ए.एस्.रामनाथदीक्षितः-काशी हिन्दूविश्वविद्यालयः, वाराणासी-1961
7. सामवेद ग्रामगेयगानम्-सम्पादकः रा. नारायणस्वामी दीक्षितः, प्रकाशकः-चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली-2004
8. सामवेदसंहिता-संपादक-श्रीपाद दामोदर सातवलेकर, प्रकाशकः-स्वाध्याय मण्डल, पारडी-1956
9. पञ्चविधसूत्रम्- वि. आर् शर्मा, राष्ट्रियसंस्कृतविद्यापीठ, तिरुपति-1970
10. भगवद्गीता- गीताप्रेस,गोरखपुर, वर्ष-1998
11. पुष्पसूत्रम्- संपादकः-मायूरम् रामनाथ दीक्षितः, प्रकाशकः- सि पि रामस्वामी अय्यर फाउण्डेशन्, मद्रास-1989
12. छान्दोग्योपनिषदः- सम्पादक—श्रीराममूर्ति श्रौती, प्रकाशक-जगद्गुरु महासंस्थानम्, श्रृंगेरी,1998
13. अथर्ववेदसंहिता- सम्पादकः-श्रीपाद दामोदर सातवलेकर, प्रकाशकः-स्वाध्यायमण्डल, पारडी, 1957
14. तैत्तिरीयसंहिता- सम्पादकः-श्रीपाद दामोदर सातवलेकर, प्रकाशकः-स्वाध्यायमण्डल, पारडी
15. ऋग्वेदप्रातिशाख्यम्- डा विरेन्द्रकुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली-1999
16. सामवेदीयप्रकृतिगानम्- सम्पादकः- डा गिरिजाप्रसाद षडंगी, तिरुपति, 2019
17. अथर्वप्रातिशाख्यम्- डा सूर्यकान्तः, मेहरचन्द लक्षणदास, मुम्बई संवत्-1969
18. सामविधानब्राह्मणम्- डा वि आर् शर्मा, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति-1962
19. जैममिनीयब्राह्मणम्- डा रघुवीरः, नागपुर-1950
20. खादिरगृह्यसूत्रम्- ठाकुर उदयनारायण सिंह, प्रकाशकः-चौखम्बा संस्कृतप्रतिष्ठानम्, वाराणसी